# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

# वार्षिकपरीक्षा, एप्रिल-२०१६

**कक्षा - शास्त्री-३ ( Yearly )** **प्रश्नपत्र-४** **गुणाः - १००**

**विषयः - वेदसंहिता** **समयः - ११:०० तः ०२:००**

**दिनाङ्कः - २१-०४-२०१६** **सन्दर्भग्रन्थः - सामवेदः ( पूर्वार्चिके तृतीयाध्यायन्तः ), अथर्ववेदः-१२/१**

---

**( क ) सामवेदः**

**प्रश्नः -१ अधोलिखितेषु चतुर्णां मन्त्राणां व्याख्या कार्या ।** **२०**

*(१) अग्न आ याहि वीतये गृणानो हव्यदातये ।*
*नि होता सत्सि बर्हिषि ॥*

*(२) अग्निर्वृत्र्ााणि जङ्घनद् द्रविणस्युर्विपन्यया ।*
*समिद्धः शुक्र आहुतः ॥*

*(३) शं नो देवीरभिष्टये शं नो भवन्तु पीतये ।*
*शं योरभि स्रवन्तु नः ॥*

*(४) नमस्ते अग्न ओजसे गृणन्ति देव कृष्टयः ।*
*अमैरमित्रमर्दय ॥*

*(५) अग्निं वो वृधन्तमध्वराणां पुरूतमम् ।*
*अच्छा नप्त्रे सहस्वते ॥*

*(६) एमना वो अग्निं नमसोर्जो नपातमा हुवे ।*
*प्रियं चेतिष्ठमरतिं स्वध्वरं विश्वस्य दूतममृतम् ॥*

**प्रश्नः -२ सामवेदस्य वैशिष्ट्यं महत्त्वं च वर्णयत ।** **२०**

**अथवा**

**सामवेदस्य पूर्वाचिकस्य आग्नेयपर्वणः प्रथमाध्याये प्रतिपादितम् अग्निस्तुतिपरकमन्त्राणां विवेचनां करुत ।**

**प्रश्नः -३ अधोलिखितेषु द्वयोः टिप्पणीं लिखत ।** **१०**

*(१) सामवेदस्य स्वरसङ्केतः उच्चारणपद्धतिश्च ।* *(२) सामवेदस्य ऋत्विक् ।*

*(३) सामवेदस्य शाखाः ।* *(४) अग्नेः गुणाः ।*

**( ख ) अथर्ववेदः**

**प्रश्नः -४ अधोलिखितेषु चतुर्णां मन्त्राणां व्याख्या कार्या ।** **२०**

*(१) सत्यं बृहदृतमुग्रं दीक्षा तपो ब्रह्म यज्ञः पृथिवीं धारयन्ति ।*
*सा नो भूतस्य भवस्य पत्न्युरुं लोकं पृथिवी नः कृणोतु ॥*

*(२) असंबाधं बध्यतो मानवानां यस्या उद्वतः प्रवतः समं बहु ।*
*नानावीर्या ओषधीर्या बिभर्ति पृथिवी नः प्रथतां राध्यतां नः ॥*

*(३) अग्निवासाः पृथिव्यऽसितज्ञूस्तिषीमन्तं सिशितं मा कृणोतु ।*

*(४) ता न: प्रजा: सं दुह्रतां समग्रा वाचो मधु ।*

*पृथिवि धेहि मह्यम् ॥*

*(५) यस्या माप: परिचरा: समानीरहोरात्रे अप्रमादं क्षरन्ति ।*

*सा नो भूमिस्त्विर्षिं बलं राष्ट्रे दधातूत्तमे ॥*

*(६) इन्द्रो यां चक्र आत्मनेऽनमित्रां शचीपति: ।*

*सा नो भूमिर्वि सृजतां माता पुत्राय मे पय: ॥*

**प्रश्नः -५ अथर्ववेदीय भूमिसूक्तस्य उपयोगिता आधुनिकसमाजे अस्ति न वा विचारयत । १०**

**अथवा**

**भूमिसूक्ते प्रतिपादितं राष्ट्रियभावनां प्रकटयत ।**

**प्रश्नः -६ मातृभूमेः संरक्षणार्थं के के उपायाः अवलम्बनीयाः भूमिसूक्ताधारेण प्रतिपादयत । १०**

**अथवा**

**मातृभूमेः स्तुतिपरकमन्त्राणां व्याख्यां कुरुत ।**

**प्रश्नः -७ अधोलिखितेषु द्वयोः टिप्पणीं लिखत । १०**

*(१) पर्जन्य: पिता ।* *(२) पृथिव्या: उदारभावना ।*

*(३) पृथिव्या: गुणा: ।*

---------------------